


# Akulavira Tantra

*The yogi should continually practise showering himself with nectar. He becomes free from old age and liberated and devoid of all disease. He plays within the Ocean of Samsara, dearest one, is accomplished and independent -* ***Kaulajnananirnaya VII, 20***

The *Akulavira* opens with the following salutation: "Hail to the lotus feet of Shri Macchanda. I bow to Shri Minanatha, full of the bliss of Sahaja, liberated from the stain of Maya, supreme, diffused through the universe, in whom all the adharas are deep and still, born from his own self.

"Now I will declare the supremely marvellous Akulavira, the ultimate secret of secrets, creating the multitude of Siddhas in their real states. [1]

"By grace of the worlds, this was spoken by Siddha Natha. One who desires it should conceal it carefully, according to the rule. [2]

"Just as those beings sunk in the ocean of Samsara take refuge with the great and as all rivers flow into the oceans, [3] So in the Akula Vira all dharmas are dissolved. [3½]."

This text takes a very radical but entirely typical Natha stance, saying that the Akulavira, elsewhere described as the Parampadam (the supreme part) and the Sahajanandam (spontaneous bliss), alone gives liberation. It is identical with the guru. Akula, as Bagchi points out, is Shiva, the witness while Kula is Shakti, the cluster of energies.

Fools, deluded by Mahamaya, and deluded by the net of different shastras, follow Buddhism, Somasiddhanta, the Nyayas, Mimamsa, Pancharatra, Vama, Dakshina and Siddhanta, Itihasa, Purana, Bhutatattva and Garuda, Shiva agamas, with the false notion that these will bring liberation, the text says. But they have false notions and are enmeshed in useless discussions which do not liberate them from samsara. That liberation can only be found in the Akulavira. (verses 5 to 10).

Nor can it be achieved by piercing the chakras, by concentrating on nadis such as the Ida, Pingala or the Sushumna, or concentrating on adharas (chakras) whether in the navel, the throat, the heart, the head, or the top of the skull, this text says. Pranayama does not bring liberation either, nor thinking of the granthis, the bindu, or the centre in the forehead. Rasayana (alchemy) does not bring realisation of Akulavira either.

In a remarkable verse (56), it is said that the path of the Kaula is of two types - the artificial (kritaka) and the sahaja (spontaneous). The real or Sahaja is that in which Samarasa resides.

Akulavira it appears, cannot be defined by texts or schools of philosophy. It is all knowing, stainless (niranjana), everywhere, and has all the good qualities, facing in every direction. Once having seen this supreme form, the mind becomes calm.

Puja, going to tirthas, oblations, scents and the entire paraphernalia of the tantras, does not allow the realisation of Akulavira. Any bad pandit who reckons that such or other things will bring realisation merely serves to delude confused and deluded people.

As ghee resides latent in milk, as fire is ready to burst forth in wood, just as scent is inherent in blooms, oil in the sesame plant, the shadow of a tree in the tree, as bliss in wine, or as effulgence in a flame, so the Akulavira subsists in the world.

Akulavira is neither dharma nor adharma, it is free of both maintenance and dissolution, it is neither bound nor that which binds. The Akulavira is very deep and marvellous, being both above the pinda and devoid of pinda. It is of the essence of samarasa.

Yajna (fire sacrifice), self imposed restraints, japa (recitation of mantras), archana (worship), homa and sadhana, mantra, puja, bathing, vows are nothing whatever to do with Akulavira, which is without supports (niralamba pada), the peaceful (shanta), free of actions, all nowing, complete, free of both "is" and "is not", free of dualism and monism, and situated in one's own body.

When the feeling of samarasa exists, "he is Shiva, he is clearly the Deva, and he is the Moon, the Sun and Shankara. He is Vishakhya (Skanda), he is Mayuraksha (Indra), and similarly he is Buddha. His self is Devi, his self is the

Deva, he is the pupil and he is the guru. He is the act of meditation, he is that meditated upon, he is the guru, the lord of all." (Verses 129-130).

अकुलवीरतन्त्रम्

श्रीमच्छन्दपादकेभ्यो नमः

श्रीमीनसहजनन्दं स्वकीयाङ्गसमुद्भवम्।

सर्वमाधारगम्भीरमचलं व्यपकं परम्।

अथातः सम्प्रवयामि अकुलवीरं महद्भूतम्।

गुह्याद् गुह्यतरं गुह्यं सिद्धसद्भावसन्ततिः॥ १॥

अनग्रहाय लोकानां सिद्धनाथेन भाषितं।

गोपनीयं प्रयत्नेन यदीच्छन् शाश्वतं पदम्॥ २॥

संसारार्णवमग्नातां भूतानां महदाश्रयम्।

यथा नदीनदाः सर्व्वे सागरे समुपागताः॥ ३॥

तथा अकुलवीरेषु सर्व्वधर्म्मा लयङ्गताः।

सर्व्वाधारमशेषस्य जगतः सर्व्वदा प्रभुः॥ ४॥

सहजानन्दं न विन्दन्ति सर्व्वधर्म्मसमासृताः।

अनानन्तमलैर्ग्रस्ता महामायान्धच्छदिताः॥ ५॥

शास्त्रजालेन सन्तुष्टा मोहितास्त्यजयन्तिताः (?)।

न विन्दन्ति पदं शान्तं कौलानां निष्कलं गुरुम्॥ ६॥

संवादयन्ति ये केचिन् न्यायवैशेषिकास्तथा।

बौधास्तु अरिहन्ता ये सोमसिद्धान्तवादिनः॥ ७॥

मीमांस पञ्चस्त्रोताश्च वामसिद्धान्तदक्षिणाः ।

इतिहासपुराणञ्च भूततत्त्वन्तु गारुडम् ॥ ८ ॥

एभिः शैवागमैः सर्व्वैः परोक्षञ्च क्रियान्विताः ।

सविकल्पसिद्धिर्सञ्चारंतत् सर्व्वं पापबन्धवित् ॥ ९ ॥

विकल्पबहुलाः सर्व्वैर्म्मिथ्यावादा निरर्थकाः ।

न ते मुञ्चन्ति संसारे अकुलवीरविवर्ज्जिताः ॥ १० ॥

सर्व्वज्ञं सर्व्वमासृत्य सर्व्वतो हितलक्षणम् ।

सर्व्वेषां सिद्धिस्तत्रस्था सर्व्वसिद्धिश्च तत्र वै ॥ ११ ॥

यत्नासौ अकुलवीरो दृश्यते सर्व्वतोमुखम् ।

तं विदित्वा परं रूपं मनो निश्चलतां व्रजेत् ॥ १२ ॥

शब्दरूपरसस्पर्शगन्धश्चैवात्र पञ्चमम्

सर्व्वभावाश्च तत्रैव प्रलीणाः प्रलयं गताः ॥ १३ ॥

भावाभावविनिर्म्मुक्त उदयास्तमनवर्ज्जितः ।

स्वभावमतिमतं शान्तं मनो यस्य मनोमयम् ॥ १४ ॥

अकुलवीरमिति ख्यातं सर्व्वाधारपापरम् ।

नाधारलक्षभेदन्तु न नादगोचरे पठेत् ॥ १५ ॥

हृदि स्थाने न वक्रे च घण्टिका तालरन्ध्रके ।

न इडा पिङ्गला शान्ता न चास्तीति गमागमे ॥ १६ ॥

न नाभिचक्रकण्ठे च न शिरे नैव मस्तके ।

तथा चक्षुरुन्मीलने च न नासाग्रनिरीक्षणे ॥ १७ ॥

न पूरककुम्भके तत्र रेचके [च] तथा पुनः ।

न बिन्दुभेदके ग्रन्थौ ललाटे न तु वह्निके ॥ १८ ॥

प्रवेशनिर्गमे नैव नावाहनविसर्ज्जनम् ।

न करणैर्नासनं मुद्रैर्नमासे भिन्नतालुके ॥ १९ ॥

न निरोधो न चोद्धारो नातीतां चालनं न हि ।

न प्रेर्य्यप्रेरकञ्चैव न स्थानन्नैव चश्रयम् ॥ २० ॥

न चात्मनैव तद् ग्राह्यं ग्राह्यातीतपदं भवेत् ।

एतत् पक्षविर्निर्मुक्तं हेतुदृष्टान्तवर्ज्जितम् ॥ २१ ॥

न दूरे न च वै निकटे न भरितो न च रिक्तकः ।

न उन्नोन सोऽधिक एभिः पक्षैर्विवर्ज्जितम् ॥ २२ ॥

यश्च विंशात्मको ह्येष पुद्गल नास्ति यत्र वै ।

यत्र लक्षं न विद्येत अकुलवीर स उच्चयते ॥ २३ ॥

यस्यैवं संशितं कश्चित् समरस संशितः ।

स ब्रह्मा सो हरिश्चैशः स रुद्रो स च ईश्वरः ॥ २४ ॥

स शिवः परमदेवः स सोमार्काग्निकस्तथा ।

स च सांख्यः पुराणाश्च अर्हन्तबुद्ध एव च ॥ २५ ॥

स्वयं देवी स्वयं देवः स्वयं शिष्यः स्वयं गुरुः ।

स्वयं ध्यानं स्वयं ध्याता स्वयं सर्व्वत्र देवता ॥ २६ ॥

यादृशेन तु भावेन पुरुषो भावयेत् सदा ।
तादृशां फलमाप्नोति नात्र कार्य्यविचारणात् ॥ २७ ॥
अस्यैव हि हि नामानि पृथग्भूतानि योगिभिः ।
अनाम तस्य गियन्ते भ्रान्तिज्ञानविमोहितैः ॥ २८ ॥
धर्म्माधर्म्मसमाक्लिष्टाविकल्पतमश्छादिताः ।
तेन मुञ्चन्ति संसारं नरकं योनिसंकुलम् ॥ २९ ॥
अकुलवीरं महद्भूतं यदा पश्यन्ति सर्व्वगम् ।
स बाह्याभ्यन्तरे नित्यं एकाकारं चराचरम् ॥ ३० ॥
निस्तरङ्गं निराभासं पदभेदविवर्ज्जितम् ।
सर्व्वावयवनिर्म्मुक्तं निर्लयं निर्व्विकारजम् ॥ ३१ ॥
अदृष्टनिर्गुणं शान्तं तत्त्वातीतं निरञ्जनम् ।
सर्व्वज्ञं परिपूर्णञ्च स्वभावश्चैवमक्षयम् ॥ ३२ ॥
कार्य्यकारणनिर्म्मुक्तमचिन्त्यमनामयम् ।
मायातीतं निरालम्बं व्यापकं सर्व्वतोमुखम् ॥ ३३ ॥
समत्वं एकभूतञ्च ऊहापोहविवर्ज्जितम् ।
अकुलवीरं महद्भूतं अस्तिनास्तिविवर्ज्जितम् ॥ ३४ ॥
न मनो न च वै बुद्धिर्न चिन्ताचेतनादिकम् ।
न कालः कलनाशक्तिर्न शिवो न च इन्द्रियः ॥ ३५ ॥
न भूते गृह्यते सो हि न सुखं दुःखमेव च ।

न रसो हि न सुखं दुःखमेव च ॥ ३६ ॥

न रसो विरसश्चैव न कृतो न च जायते ।

न च्छाय न च तापस्तु न शीतो न च उष्णवान् ॥ ३७ ॥

न दृश्यते मन स्तत्र उदयास्तमनवर्ज्जितम्

न सीमा दृश्यते तत्र न च तिर्थ्यं न चहिर्वाहि ॥ ३८ ॥

अद्वैतमचलं शान्तं संगदोषविवर्ज्जितम् ।

निराकुलं निर्व्विकल्पञ्च निबद्धञ्च मलक्षणम् ॥ ३९ ॥

अनाथं सर्व्वनाथञ्च उन्मनां मदवर्ज्जितम् ।

अनिगृढमसन्धिञ्च स्थावरं जङ्गमेव च ॥ ४० ॥

ज्वलज्ज्वलनभूम्या च आपोश्चैव तथैव च ।

सर्व्वं समरसं पूर्णं अकुलवीरन्तु केवलम् ॥ ४१ ॥

यस्यैषा सम् ।स्थिता मुक्तिः स मुक्तो भवबन्धनात् ।

न तस्य मातापिता व बान्धवं न च देवता ॥ ४२ ॥

न यज्ञं नोपवासञ्च न क्रिया वर्णभेदकम् ।

त्यक्तवा विकल्पस ।घातम् अकुलवीरलयं गताः ॥ ४३ ॥

न जपो नार्च्चनं स्नानं न होमं नैव साधनम् ।

अग्निप्रवेशनं नास्ति हेतन्तभृगु नोदनम् ॥ ४४ ॥

नियमोऽपि न तस्यास्ति नोपवासो विधीयते ।

पितृकार्य्यं न करोताति तीर्थयात्राव्रतानि च ॥ ४५ ॥

धर्म्माधर्म्मफलं नास्ति न स्नानं नोदकक्रिया।
स्वयं त्यज सर्व्वकार्य्याणि लोकाचाराणि यानि च॥ ४६॥
समयाचारविचारञ्च कृतका बन्धकानि तु।
संकल्पञ्च निकल्पञ्च ये चान्ये किल धर्म्मिणः॥ ४७॥
भवे योगी निराचारो पशुचारविवर्ज्जितः।
सिद्धिश्चविविधाकार पाताले च रसायनम्॥ ४८॥
प्रत्यक्षञ्च या लब्धं न गृह्णीयात् कदाचन।
सर्व्वञ्च पाशजालञ्च अधोमार्गप्रदायकः॥ ४९॥
एतेषु मोचना नास्ति अकुलवीरविवर्ज्जिताः।
यथा ताः न जानन्ति स्वादं कटुमधुरस्य तु॥ ५०॥
तथा अकुलवीरन्तु न जानन्ति स्वभावगम्।
यथा मदिरा महान्तस्य कथितं नेवशकृते॥ ५१॥
रस्यपरमानन्दमतिगुह्यं सुगोपितम्
लोकानां च हितार्थाय सिद्धनाथेन भाषितम्॥ ५२॥
निर्व्विकल्पं पदं शान्तं यत्र लीनं परापरम्।
मोक्षस्य तन्महास्थानं मन्त्ररूपविवर्ज्जितम्॥ ५३॥
तत्रैव सृष्टिरूपेण पुनस्तत्र लयं गता।
किन्तेन बहुनोक्तेन सर्व्वबन्धविवर्ज्जितम्॥ ५४॥
अकुलवीरं यदा लब्धं तदा किं कौलिकैः क्रमैः।

लब्ध्वा तु मोक्षसद्भावम् अकुलवीरं महापहम् ॥५५॥

कौलमार्गे द्वयो सन्ति तका सहजा तथा।

कुण्डलि तका ज्ञेया सहजा समरस स्थिता ॥ ५६ ॥

प्रेर्यप्रेरकभावस्था कृतका साऽभिधीयते।

ततः स पातयेद् भूमै मुद्रामन्त्रैर्नियोगितैः ॥ ५७ ॥

आहुते पतने चान्ये कर्णजापेन धूपकैः।

एतत् साध्यमिदं तत्त्वं एतद् ध्यानञ्च धारणा ॥ ५८ ॥

अनेकैः कर्म्मसंघातैः नानामार्गविभावनैः।

विकल्पकललोल्लोया उद्भ्रान्ता भ्रान्तचेतसः ॥ ५९ ॥

हृदि शोकेन सन्तप्ता व्यासङ्गाच्च महाभयैः।

हर्षविषादसम्पन्ना शोच्यमाना मुहुर्मुहुः ॥ ६० ॥

तावद्भ्रमन्ति संसारे कल्पाकल्पैर्भवार्णवैः।

दग्धबीजेषु संभूतिर्यथा नैव प्रजायते ॥ ६१ ॥

मूलछिन्ने यथा वृक्षे न प्ररोहं विद्यते।

अकुलवीरगतं भिन्नं नानाभावानुबन्धनैः ॥ ६२ ॥

न बध्यते यथा विमले रसं विप्रलयं गतम्।

तद्वदकुलवीरे च सत्त्वे भ्राभ्राख्य यद्गतः ॥ ६३ ॥

तिमिरेण यथाच्छन्नमुदितार्कं न पश्यति।

अज्ञानमनस्तद्वद् भ्रान्तिजालविमोहिता ॥ ६४ ॥

अकुले वीरे च सम्प्राप्ते सर्व्वमेतद्विनिश्यति ।
दधिमधे यथा सर्पिः काष्ठे चाग्नि स्थितो यथा ॥ ६५ ॥
पुष्पे गन्धस्तिले तैलं वृक्षे चाया समाश्रिता ।
मद्यमध्ये यथानन्दं दीपे प्रभा समाश्रिता ॥ ६६ ॥
पद्ममध्ये च कुण्डल्या अङ्गप्रत्यङ्गमेव च ।
रक्तार्थाकुलवीरे च तत्सर्व्वं विनियोजितम् ॥ ६७ ॥
भावाऽभावादिसम् ।युक्तैः प्रत्ययैर्दृष्टिगोचरैः ।
अकुलवीरं न जानन्ति कृतकैर्मोहितात्मनः ॥ ६८ ॥
पाशजालनिबद्धाश्च महामायविमोहिताः ।
न जानन्ति पदं शान्तमचिन्त्यं नित्यसम्भवः ॥ ६९ ॥
सर्व्वव्यापिभावस्थं स्थानवर्णविवर्ज्जितम् ।
सर्व्वभूतस्थितं ह्येकमध्ययं धेयवर्ज्जितम् ॥ ७० ॥
स च सर्व्वगतो भावः स्थिरे पूर्णो निरन्तरे ।
तत्र मनो विलीनन्तु अचलं भवतन्मयम् ॥ ७१ ॥
मनोवृद्धिस्तथा चिन्त्यं विक्षप्ता तन्मयतां गता ।
यथा तिष्ठति तत्त्वस्थः शिवनिष्कलमव्यये ॥ ७२ ॥
तदा तन्मयतां याति निर्म्मलं निश्चलं पदम् ।
अकुलवीरं महद्भुतमेकवीरं च सर्व्वगम् ॥ ७३ ॥
दुर्लभं सुरसिद्धानां योगिनीनाञ्च गोचरम् ।

केचिद् वदन्तीदं धर्म्ममिदं शास्त्रमिदं तपः ॥ ७४ ॥

अयं लोकमिमं स्वर्गमिदं साध्यमिदं फलम् ।

इदं ज्ञानञ्च विज्ञानं शुद्धाशुद्धमिदं परम् ॥ ७५ ॥

ज्ञेयञ्च तत्त्वकूटञ्च यत्र ध्यानञ्च धारणा ।

तदासौ योगिनी ह्येकः नान्यस्तु हि द्वितीयकः ॥ ७६ ॥

अनागतन्तु गतञ्चैव न हच्छेन्न च तिष्ठति ।

न भूतं न भविष्यञ्च स्थितिप्रलयवर्जितम् ॥ ७७ ॥

न चाहं प्रचितैर्दोषैः लिप्तते न कदाचन ।

नाहं कश्चिन्न मे कश्चिन्न बद्धो न च बाधकः ॥ ७८ ॥

न मुक्ति वै न च न मुक्तमे मोक्षस्य च स्पृहा ।

गच्छंस्तिष्ठन् स्थपन् जाग्रद्भुञ्जान मैथुनेऽपि वा ॥ ७९ ॥

भयदारिद्रशोकैश्च विविधैर्भक्षणैस्तथा ।

चिकित्सा नैव कुर्व्वीत इन्द्रियार्थैः कदाचन ॥ ८० ॥

आचरेत् सर्व्ववर्णैस्तु न तु भक्ष्यं विचारयेत् ।

एवं स चरते योगी यथारण्ये हुताशनः ॥ ८१ ॥

पिण्डबधाञ्च नानास्ति अवस्था मुर्खवासनाम् ।

सोमशून्यस्तथा वह्निप्राणायमवर्ज्जितम् ॥ ८२ ॥

अप्रमेयनिराभासं धारणाध्यानवर्ज्जितम् ।

येन जन्मसहस्राणि भक्त्या संपूजितो गुरुः ॥ ८३ ॥

ते लभन्ति महाज्ञानं अकुलवीरन्तु मोक्षदम्

योगिनीराकिणीचक्रे यस्य भक्तिः सुनिश्चला ॥ ८४ ॥

अकुलवीरं महद्भूतं गम्भीरं गहनामयम् ।

पिण्डातीतं यदा ज्ञेयमपिण्डं पिण्डवर्ज्जितम् ॥ ८५ ॥

पदव्यञ्जननिर्म्मुक्तं विमलं सततोदितम् ।

तल्लिने तन्मयात्मानं विन्दते श्वाश्वतं पदम् ॥ ८६ ॥

चितातीतं भवेत् सो हि योगसंयोगवर्ज्जितम् ।

निर्व्वाणं वासनाहीनं तृप्तात्म च निरामयः ॥ ८७ ॥

तेन लब्धा न सन्देहोऽमला मलच्छेदनाः ।

तस्य प्रवर्त्तते क्षिप्तं तस्यैव सर्व्वसर्व्वगम् ॥ ८८ ॥

वेदसिद्धान्तशास्त्राणि नानाविधानि शिखानि च ।

तानि सर्व्वाणि मोहानि कायक्लेशैर्निरर्थकम् ॥ ८९ ॥

विद्याहङ्खारग्रस्तास्तु गर्व्विताः कुगतिं गताः ।

अनर्थेन च सन्तुष्टा बहुग्रन्थार्थचिन्तकाः ॥ ९० ॥

अकुलवीरं न विन्दन्ति कृतकैर्म्मोहितामनः ।

गर्व्वितानं कुतो ज्ञानं ग्रन्थकोटिशतैरपि ॥ ९१ ॥

कर्पूरकुङ्कुमादीनां वस्त्रताम्बूलमेव च ।

खरवद्भवति तद्भारं सर्व्वं तस्य निरर्थकम् ।

अकुलवीरञ्च देहस्थं यदा पश्यति सर्व्वगम् ॥ ९२ ॥

धर्म्माधर्म्मफलं नास्ति नोदकं तीर्थसेवना ।

न क्रिया सत्यश्चैवं वा कर्मकाण्डे न भावना ॥ ९३ ॥

न तस्य कर्म्मकर्म्माणि लोकाचाराणि यानि च ।

चरिताः समयाचारा जनैर्भ्रान्तिविमोहितैः ॥ ९४ ॥

अकुलवीरं न जानन्ति किं विशिष्टं कुतः स्थितम् ।

कृतका बन्धना लोके कल्पिताश्च कुपण्डितैः ॥ ९५ ॥

सम्।कल्पविकल्पञ्च कलाकर्म्माणि यानि च ।

सिद्धयो विविधा लोके पातालम् च रसायनम् ॥ ९६ ॥

प्रत्यक्षञ्च यदा लब्धं न विगृह्णीयात् कदाचन ।

सर्व्वे ते पाशबद्धाश्च अधोमार्गप्रदायकाः ॥ ९७ ॥

न चैतैर्म्मुक्तिः सम्।सारे अकुलं बीरवर्ज्जिताः ।

यथा मदिरमानन्दं कथितं नैव जायते ॥ ९८ ॥

तद्वदकुलवीराख्यं स्वसम्।वेद्यनिरोपणम् ।

न जानन्ति नरा मूढाः सारात् सारतरं परम् ॥ ९९ ॥

तावद् भ्रान्तिविमुग्धात्मा यावत्तलं न विन्दति ।

चितातीते यदा योगी स योगी योगचिन्तकः ॥ १०० ॥

विरक्ता वासना यस्य तृप्तात्म च निरामयः ।

तावद् भ्रमन्ति मोहात्मा नानाभावानुबन्धनैः ॥ १०१ ॥

यावत् सममेकत्वं परमानन्दं न विन्दति ।

मुर्खाणां च यथाशास्त्रं कुमारीसुरतिं यथा ॥ १०२ ॥

अकुलवीरं विन्दन्ति कथ्यमानैः कुमारिकाः ।

दिशवेशाविनिर्मुल्तं स्थानवर्णविवर्ज्जितम् ॥ १०३ ॥

निराकुलं निर्व्विकल्पं निर्गुणञ्च सुनिर्म्मलम् ।

अनाथं सर्व्वनाथञ्च प्रमादोन्मादवर्ज्जितम् ॥ १०४ ॥

घननिविडनिसन्धिस्थावरे जङ्गमेषु च ।

जले ज्वलने तथा पवने भूम्याकाशे तथैव च ॥ १०५ ॥

सर्वत्र समरसं भरितमकुलवीरन्तु केवलम् ।

न ज्ञातं येन देहस्थं स मुक्तः सर्व्वबन्धनात् ॥ १०६ ॥

न तस्य क्रियाबन्धेन न वेद्यं न च वेदना ।

न यज्ञो नोपवासश्च न चर्य्या न क्रियोदयः ॥ १०७ ॥

न वर्णो वर्णभेदश्च अकुलवीरं यदागतम् ।

न जापो नार्चानग्नीनां न होमो नैव साधनम् ॥ १०८ ॥

नाग्निप्रवेशनन्तस्य मन्त्रपूजाचरणोदकम् ।

नियमाश्च न तस्यास्ति क्षेत्रपीठे च सेवनैः ॥ १०९ ॥

न क्रिया नार्चनाकाद्यैर्न तीर्थानि व्रतानि च ।

निरालम्बपदं शान्तं तथातीतं निरञ्जनम् ॥ ११० ॥

सर्व्वज्ञपरिपूर्णञ्च स्वभावेन विलक्ष्यते ।

कार्य्यकारणनिर्म्मुक्तमचिन्तितञ्च अनामयम् ॥ १११ ॥

मायातीतं निरालम्बं व्यापकं सर्व्वतोमुखम् ।
स्वदेहे संस्थितं शान्तमकुलवीरं तदुच्चयते ॥ ११२ ॥
समस्तमेकदाभूतं द्वैताभावविवर्ज्जितम् ।
अकुलवीरं महद्भूतमस्तिनास्तिविवर्ज्जितम् ॥ ११३ ॥
मनोबुद्धिचित्तस्तचित्ता नैव स्वचेतना ।
न कालकलना चैव न शक्तिश्च न चेन्द्रियः ॥ ११४ ॥
न भूते गृह्यते सो हि न दुःखं सुखमेव च ।
न रसोऽधिरसस्चैव कृतकं नैव कारकम् ॥ ११५ ॥
न च्छाया नातपो वह्निर्न च शीतोष्णववेदना ।
न दिनं रात्रिमित्युक्तमुदयास्तमनवर्ज्जितम् ॥ ११६ ॥
न मनो दृश्यते तत्र नोद्ध्र्वमध्यं च ज्ञायते ।
अक्षोभ्यमचलम् शान्तमीदृशं तत्त्वनिर्णयम् ॥ ११७ ॥
यादृशेन तु भावेन पुरुषो भावयेत् सदा ।
तादृशं फलमाप्नोति नात्र कार्य्यविचारणात् ॥ ११८ ॥
एवञ्च कुलसद्भावमवाच्यं परमामृतम् ।
अगम्यं गम्यते कस्माद् भ्रान्तिज्ञानविहोहिताः ॥ ११९ ॥
न दूरे न निकटे चैव प्रत्यक्षं न परोक्षता ।
न भरितो न रिक्तो वा निपुणो नापि चाधिकः ॥ १२० ॥
एतत्पक्षविनिर्म्मुक्तो हेतुदृष्टान्तवर्ज्जितः ।

कृतकैर्म्मोहिता मूढाः कर्म्मकाण्डरतास्तु ये ॥ १२१ ॥
न तेषां मुक्तिः संसारे नरके योनिसंकुले ।
अकुलवीरं महद्भूतं यदा पश्यति सर्व्वगम् ॥ १२२ ॥
सबाह्याभ्यन्तरैकत्वम् सर्व्वत्रैव व्यवस्थितम् ।
निस्तरङ्गं निराभासं पदच्छेदविवर्ज्जितम् ॥ १२३ ।
। सर्व्वावयवनिर्म्मुक्तं निर्व्विकारञ्च निर्म्मलम् ।
अदृश्यं निर्गुणं नित्यं निर्णिरोधञ्च निश्चलम् ॥ १२४ ॥
न ध्यानं धारणा नैव न स्थानं वर्णमेव च ।
न रेचकं पूरकञ्चैव नरोद्घातञ्च कुम्भकम् ॥ १२५ ॥
न चान्तमादिमध्यस्थं न सतो वृद्धिरेव च ।
ग्राह्यग्राहकनिर्म्मुक्तग्रन्थातीतञ्च यद्भवेत् ॥ १२६ ॥
एतैः सर्व्वैर्व्विनिर्म्मुक्तं हेतुदृष्टान्तवर्ज्जितम् ।
सबाह्याभ्यन्तरैकत्वं सर्व्वत्रैव व्यवस्थितम् ॥ १२७ ॥
समरसानन्द्ररूपेण एकाकारं चराचरे ।
ये च ज्ञातं स्वदेहस्थमकुलवीरं महद्भूतम् ॥ १२८ ॥
यस्या वशं स्थितः कश्चित् समरसं रससंस्थितम् ।
स ब्रह्मा स हरिश्चैव स रुद्रश्चैवेश्वरस्तथा ॥ १२९ ॥
स शिवः शाश्वतो देवः स च सोमार्कशङ्करः ।
स विशाख्यो मयुराक्षो अर्हन्तो बुधमेव च ॥ १३० ॥

स्वयं देवि स्वयं देवः स्वयं शिष्यः स्वयं गुरुः ।

स्वयं ध्यानं स्वयं ध्याता स्वयं सर्व्वेश्वरो गुरुः ॥ १३१ ॥

सर्व्वज्ञः सर्व्वमासृत्य सर्व्वतो हितलक्षणः ।

सर्व्वयोगिनी तत्रस्था सर्व्वे सिद्धास्च तत्र वै ॥ १३२ ॥

सर्व्वं सर्व्वार्थकं चैव सर्व्वज्ञानश्च तत्र वै ।

यथासौ महार्थञ्च अकुलवीरमिति स्मृतम् ॥ १३३ ॥

शब्दः स्पर्शो रसो रूपं गन्धो वद्याणिपम च ।

सर्वे भीराश्च तत्रैव ये प्रलीनाः प्रलयं गताः ॥ १३४ ॥

नाधारे ध्येयलक्ष्ये च न नादगोचरे परे ।

न दि नाभिकण्ठे वा वक्रे घण्टिकरन्ध्रयोः ॥ १३५ ॥

न इडा पिङ्गला चैव सुष्मण च गमागमैः ।

न नाभिचक्रे कण्ठे च न शिरे बिन्दुके तथा ॥ १३६ ॥

चक्षुकर्णोन्मीलनं नैवं नासिकाग्रनिरीक्षणे ।

न पूरके कुम्भके चैव रेचके च तथा पुनः ॥ १३७ ॥

न बिन्दुभेदग्रन्थौ च ललाटे न च चन्द्रमाः ।

प्रवेशे निर्गमे चैव शिखा ऊर्द्ध्वे न बिन्दुके ॥ १३८ ॥

न करैर्न सरैर्मुद्रैः नाकाशो वायुमण्डले ।

न चापे चन्द्रसुर्य्ये च भावाभावे समागमे ॥ १३९ ॥

अनौपम्यं निरालम्बं पक्षापक्षविवर्ज्जितम् ।

अज्ञानमलग्रस्तात्मा महामायविमोहिताः ॥ १४० ॥

शास्त्रार्थेन विमुढात्मा मोहिता विदुषो जनाः ।

न विदन्ति पदं शान्तं कैवल्यं निश्क्रियं गुरुम् ॥ १४१ ॥

संख्यादयस्च ये केचित् न्यायवैशेषिकास्तथा ।

बौद्धारहन्ताश्च ये केचित् सोमसिद्धान्तदक्षिणाः ॥ १४२ ॥

मीमांसा पञ्चरात्रञ्च वामदक्षिणकौलिकाः ।

इतिहासपुराणानि भूततत्त्वञ्च गारुडम् ॥ १४३ ॥

एते चैव समाः सर्व्वे केचित् वाऽपि क्रियान्विताः ।

विकल्पसिद्धिदाः सर्व्वे तद्विदुर्न च पण्डिताः ॥ १४४ ॥

विकल्पबहलाः सर्व्वे मिथ्यावादनिरर्थकाः ।

न ते मुच्यन्ति संसारे अकुलवीरविवर्ज्जिताः ॥ १४५ ॥

यानि कानि च स्थानानि गिरिर्निगरसागरम् ।

सर्व्वत्र संस्थितं नित्यं स्थावरे जङ्गमेषु च ॥ १४६ ॥

पञ्चभूतात्मकं सर्व्वे यत् किञ्चित् सचराचरम् ।

शिवाद्यदेवपर्य्यन्तं सर्व्वं तत्रैव संस्थितं ॥ १४७ ॥

ईदृशं योगिनं दृष्ट्वा उपसर्पन्ति ये नराः ।

गन्दैः पुष्पैश्च धूपैश्च खानपानादिभक्षणैः ॥ १४८ ॥

तर्पयन्ति च ये भक्तास्त्रिविधैस्चैवान्तरात्मना ।

तेऽपि बन्दैः प्रमुच्यन्ति मुक्तिमार्गी न काङ्क्षिणः ॥ १४९ ॥

ब्रह्मेन्द्रविष्णुरुद्रश्च अरहन्ता बुद्धमेव च ।

विषाख्यो मयूराक्ष ये च ऋषयस्तपोधनाः ॥ १५० ॥

देवादिभो नरेन्द्राश्च ये चान्ये मोक्षकाङ्क्षिणः ।

ते सर्व्वे मोक्षमिच्छन्ति अकुलवीरन्तु मोक्षदम् ॥ १५१ ॥

अथान्यं संप्रवक्ष्यामि भिन्नावस्थां स्वभागः ।

पूर्वं यदुक्ता सर्व्वे अन्वयमार्गे त्वकौलिके ॥ १५२ ॥

* * * * * * * * * *

* * * * * * * नात्र संशयः ॥ १५३ ॥

न जरास्तेषां न मृत्युश्च न शोको दुःखमेव च ।

सर्व्वव्याधिहरश्चैव न पुनर्भवसंभवः ॥ १५४ ॥

अकुलवीरं स्थितं दिव्यं सिद्धनाथप्रसादतः ।

सर्व्वतः सर्व्वदा शुद्धः सर्व्वतः सर्व्वदा प्रभुः ॥ १५५ ॥

इति मच्छेन्द्रपादावतारिते कामरूपिस्थाने योगिनीप्रसादाल्लब्धम् अकुलवीरं

समाप्तम्